# V.P.M's
# B. N. Bandodkar College of Science, Thane
## Junior College
## F.Y.J.C First Terminal Examination September 2018
## Subject: Sanskrit

**Day: Friday** 
**Date: 21.09.2018**

**Time: 10.00 am to 11.00 am** 
**Marks: 25**

Note: १. सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम् |
२. यथासूचनम् आकलनकृतयः व्याकरणकृतयः आरेखितव्यः |
३. आकृतीनाम् आलेखनं मसिलेखन्या कर्तव्यम् |

प्रथमः विभागः - गद्यम् |

[ अवबोधनम् , शब्दसम्पत्तिः , पृथक्करणम् , स्पष्टीकरणम् ]

प्र .१ अ] गद्यांशं पठित्वा निर्दिष्टा कृती कुरूत |

अ१] अवबोधनम् [केऽपि २ कृती कुरूत | ] ०२

i] उचितं कारणं चित्वा वाक्यं पुनर्लिखत |

बालिका चलितुं शक्नुयात् , यत ः .......................

अ. यदा सा चलितुं प्रयतते तदा सा पतति |

ब. पतनस्य भीत्या सा चलनं न त्यजति |

ii] राघवः एतद् दृश्यं पश्यन् एव स्थितः | [राघवः स्थाने सः सर्वनामस्य प्रयोगं कुरूत |]

iii] रेखाङ्कितं पदमाधृत्य संस्कृतभाषाया प्रश्ननिर्माणं कुरूत |

<u>सागरतरङ्ग</u> अपि अस्मान् पाठयन्ति |

समुद्रस्य समीपे धीवराणां समूहः निवसति स्म | तत्र केनचित् दृश्येन तस्य अवधानम् आकृष्टम् | कस्यचित् गृहस्य अङ्गणे एका एक वर्षीया बालिका तिष्ठति स्म | सा चलितुं प्रायतत | यदा यदा सा चलितुं प्रयतते स्म तदा तदा सा पतति स्म | तदा सा रोदिति किन्तु पुनः चलितुं प्रयतते स्म | राघव ः एतद् दृश्यं पश्यन् एव स्थितः | 'यद्यपि सा जानाति यद् अहं पतिष्यामि प्रहारम प्राप्स्यामि तथापि सा पुनः पुनः प्रयतते | मूर्ख - बालिका ! चलितुं सा किमर्थमुत्सुका इत्येव आचर्यस्य विषयः |' इति अनवधानतया सः स्वचिन्तनम् उच्चैः उक्तवान् , " महोदय , यदि पतनस्य भीत्या सा चलनंत्यजेत तर्हि सा कथं चलितुं शक्नुयात् ? तस्मिन् एव वयसि प्रायत्तसातत्यं सहनशीलता च बालकः पठति |" एतद् वचनं श्रुत्वा राघवः परिवृत्य दृष्टवान् | कश्चन् वृध्दः धीवरः तस्य पृष्ठतः स्थितः |

"पश्यतु तान् कल्लोलान् | सागरकल्लोलाः दिवानिशं प्राप्तुं प्रायतन्ते | किन्तु मध्ये एव कुत्रचित् ते भग्नाः अवन्ति, पुनः सागरे विलिनाः भवन्ति | किन्तु ते पुनः पुनः अधिकेन उत्साहेन प्रयतन्ते |" वृद्धः धीवर पुनः अवदत् , हे युवन् , मनुष्यस्य जीवनमपि तथैव अस्ति | विघ्नानां भयेन यः प्रयत्नं त्यजति , तस्य जीवनं कृतार्थता न गच्छति | अहं भवन्तं तत्त्वज्ञानं पाठयामि इति मा चिन्तयतु | एतद् जीवनस्य मूलभूतं तत्त्वम्" इति उकत्त्वा धीवरः अगच्छत् |

'एतदेव सत्यम् | सा बालिका, सागरतरङ्गा अपि अस्मान् पाठयन्ति' इति जागृतिः तस्य मनसि प्रादुर्भूता | यदा आपत्तयः मां प्राहरन् तदा मम आत्मविश्वास नष्टः | अहं पलायनं कर्तुम् ऐच्छम् | ये मयि आश्रिताः तेषां मम गृहजनानां चिन्ताम् अहं न कृतवान् | इति राघवः स्वस्य प्रमादं ज्ञात्वा चिन्तितवान् | आत्मघातस्य विचारं त्यकत्त्वा राघवः नूतनेन आत्मविश्वासेन गृहं प्रतिनिवृत्तः

अ.२] **शब्दज्ञानम्| [केऽपि २ कृती कुरूत]** 01

i] गद्यांशतः विशेषणं चिनुत |

धीवरः ........| आत्मविश्वासेन ................|

**द्वितीय विभागः - पद्यम्**

प्र.२ अ] **पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरूत |** 01

अ १] संस्कृतेन उत्तरत |

i] देवकुलैः इव कस्य यशः शोभते ?

अ २] रेखाङ्कितं पदमाधृत्य संस्कृतप्रश्ननिर्माणं कुरूत | 01

<u>अनामिका</u> सार्थवती बभूव |

सूत्रधार कृतारम्भैर्नाटकैर्बहुभूमिकैः |
सपताकैर्यशो लेभे भासो देवकुलैरिव |
पुरा कविनां गणनाप्रसङ्गे कनिष्ठिकाधिष्ठित कालिदासः |
अद्यापि तत्तुल्यकवेरभावात् अनामिका सार्थवती बभूव ||
त्रयोऽग्नयस्त्रयो देवास्त्रयो वेदास्त्रयो गुणाः |
त्रयो दण्डिप्रबन्धाश्च त्रिषु लोकेषु विश्रुताः ||

ब] **शब्दज्ञानम्** 01

विलोमशब्दाः |

गुणाः x..........|

**तृतीयः विभागः - स्थूलवाचनम् |**

३] **गद्यांशं पठित्वा निर्दिष्टा कृती कुरूत |** 02

कार्यकारणभावः तु सृष्टेः नियमः | तत्र कालौघे आधुनिकीकरणाद् औद्योगिकीकरणाच्च खगानाम् अधिवासाः क्रमशः नष्टाः भवन्ति | तष्टेषु अधिवासेषु कुत्र ते निवसेयुः प्रतिदिनं जनानां सङ्ख्या वर्धतेतराम् | लोकानां निवासार्थं,कृष्यर्थम् उद्यमवृद्ध्यर्थं तथा च यातायात सुविधार्थं मनुजेन अरण्यानां नदीनां तडागानां तथा समुद्रस्यापि उपयोगः प्रारब्धः | परिणामतः खगानाम् अधिवासाः प्रायः प्रनष्टाः विरला वा अभवन् | कृषि - उत्पादनं निष्प्रत्यूहं वृध्दिं गच्छतु इत्येतदर्थं कीटकनाशकानि उपयुज्यन्ते | कीटकास्तु खगानामन्नम् | तदेव न्यूनतां गच्छति | अथवा तद् विषमयं भवति | जलस्य नैसगिकाणि स्त्रोतांसि अपि निसर्गे मानवस्य हस्तक्षेपेण मलिनानि भवन्ति |

अ] वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं लिखत|

१. कार्यकारणभावः सृष्टेः नियमः अस्ति |

२. खगानाम् अधिवासाः प्रायः प्रनष्टाः विरलाः वा अभवन् |

## चतुर्थः विभागः परिशिष्टम् ०६

प्र.४ उचितं पर्याय चित्वा पूर्णवाक्येन उत्तरं लिखत | [केवलं ६]

१. ......... इति पञ्चम् ः वैदः |

अ. आयुर्वेदः ब. रामायणम् क. ऋग्वेदः

२. कालिदासस्य ......... शैली वर्तते |

अ. द्राविडी ब. वैदर्भी क. गांधारी

३. मेघदूतस्य काव्यप्रकारः ......... इति |

अ. चम्पूकाव्यम् ब. खण्डकाव्यम् क. मुक्तककाव्यम्

४. शिशुपालवधस्य कवि ः ......... इति |

अ. माघः ब. शिशुपाल ः क. भारवि ः

५. ......... इत्यस्मिन् नाटके नायिका अथवा स्त्रीपात्रं नास्ति |

अ. दूतवाक्यम् ब. नागानन्दम् क. मुद्राराक्षसम्

६. ......... आदिकाव्यम् |

अ. महाभारतम् ब. रामायणम् क. भागवतम्

## प्र.५ पञ्चम विभागः - लेखनकौशल्यम् ०५

अ] निबन्धलेखनम्

१. नदी २. उत्सवम् ३. लोकमान्य तिलक महोदयः

## षष्ठः विभागः व्याकरण उपयोजनकौशल्यम् |

अ] मञ्जूषातः उचितान् क्रियापदान् चित्वा कोष्ठकं पूरयत | ०६

वर्तमानकाल परोक्ष भूतकाल सर्वनाम

[ पठति, बभूव, मा, चिन्तितवान् ]

ब] तद्धितानि / कृदन्तानि परिचाययित्वा अर्थान् माध्यमभाषया लिखत |

१. अनामिका

२. जाता

३. कृतार्थता

~*~*~*~*~*~*~*~*~